हिंसार्थत्वात् स्पर्शनं प्रणिधानञ्च अस्यार्थः । स्पर्शने । यथा, रघौ । ३ । ६८ ।

"पराम्मृशन् हर्षजडेन पाणिना
तदीयमङ्गं कुलिशव्रणाङ्कितम् ।"

प्रणिधाने ।

"रामप्रवासे व्यमृशन्न दोषं
जनापवादं सनरेन्द्रमृत्युम् ।"

केकयीति भट्टिः । ३ । ७ ॥

विमर्षं परामर्शः । मृषि इति मूर्द्धन्यान्तपाठो हेयः । तर्हि क्षमेवार्थः स्यात् । इति दुर्गादासः ॥

मृष, तृ क } क्षान्तौ । इति कविकल्पद्रुमः ॥
मृष, तृ म } (अदन्त चुरा०-पर०-सक०-सेट् । अन्यत्र, अदन्त भ्वा०-उभ०-सक०-सेट् ।) महत्त्वोपधौ । क, मृषयति । म, मृषति मृषते । इति दुर्गादासः ॥

मृष, उ सेचने । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् । क्त्वावेट् ।) उ, मर्षित्वा मृष्ट्वा । इति दुर्गादासः ॥

मृष, क क्षान्तौ । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक०-सेट् ।) क, मर्षयति । अयमात्मनेपदीत्येके । इति दुर्गादासः ॥

मृष, ञ इ उ क्षान्तौ । इति कविकल्पद्रुमः ॥ (भ्वा०-उभ०-आत्म०-च-सक०-सेट् । क्त्वावेट् ।) ञ, मर्षति मर्षते । इ, मर्षते । उ, मर्षित्वा मृष्ट्वा । अपि गुरुमपराधं मर्षति ब्राह्मणानामिति हलायुधः । इति दुर्गादासः ॥

मृष, य ञ क्षान्तौ । इति कविकल्पद्रुमः ॥ (दिवा०-उभ०-सक०-सेट् ।) य ञ, मृष्यति मृष्यते ममर्ष । इति दुर्गादासः ॥

मृषा, व्य, (मृष्यत इति । मृष्+का ।) मिथ्या । इत्यमरः । ३ । ४ । ९५ ॥ (यथा, नैषधचरिते । ९ । ६८ ।

"मृषाभ्यधं नादिषते कुतूहला-
न्नलस्य नासीरगते विवेनतुः ॥")

वृथा । इति तट्टीकासारसुन्दरी ॥

मृषार्थकं, क्ली, (मृषा अर्थोऽस्य । बहुव्रीहौ कप् ।) असम्भवार्थवाक्यम् । तत्पर्य्यायः । आहतम् २ । इत्यमरः । १ । ६ । २१ । असम्भवार्थे वचसि । आहन्यते स्म आहतं क्तः । मृषा मिथ्या अर्थोऽस्य मृषार्थकं इह मृषार्थं यत् सर्व्वथा न घटते । यथा,—

"एष वन्ध्यासुतो याति खपुष्पकृतशेखरः ।
कूर्म्मक्षीरचयस्नातः शशशृङ्गधनुर्द्धरः इति ॥
यावज्जीवमहं मौनी ब्रह्मचारी पिता ममेति ।

अस्य चायं भेदः मौनित्वं ब्रह्मचारित्वं अन्यत्र सिद्धमेव वन्ध्यासुतत्वं खपुष्पत्वाद्यत्रासिद्धमिति । इति भरतः ॥

मृषाध्यायी, [न्] पुं, (मृषा ध्यायति चिन्तयतीति । ध्यै+णिनिः ।) बकः । यथा,—

"कङ्को बको बकोटश्च तीर्थसेवी च तापसः ।
मीनघाती मृषाध्यायी निश्चलाङ्गश्च दाम्भिकः ॥"

इति राजनिर्घण्टः ॥

मृषालकः, पुं, (मृषा मिथ्या अचिरस्थायित्वेन मुकुलोद्गमकाल एवेत्यर्थः । अलं अलङ्करणं कायति प्रकाशयतीति । कै+कः ।) आम्रवृक्षः । इति शब्दचन्द्रिका ॥

मृषावादः, पुं, (मृषा मिथ्या वादः कथनम् ।) मिथ्यावाक्यम् । तत्पर्य्यायः । चङ्करी २ । इति जटाधरः ॥ (यथा, महाभारते । ३ । १८८ । ३३ ।

"बहवो म्लेच्छराजानः पृथिव्यां मनुजाधिप ! ।
मृषानुशासिनः पापा मृषावादपरायणाः ॥")

मृषावादी, [न्] त्रि, (मृषा वदतीति । वद्+णिनिः ।) मिथ्यावादकः । तत्पर्य्यायः । मृषोद्यः । इति शब्दमाला ॥ मिथ्याभियोक्ता, च ॥

मृषोद्यं, क्ली, (मृषा+वद्+"राजसूयसूर्य्यमृषोद्यरुच्यकुप्यकृष्टपच्याव्यथ्याः ।" ३ । १ । ११४ । इति कर्म्मणि क्यप् । निपातितश्च ।) मिथ्यावाक्यम् । इति मुग्धबोधव्याकरणम् ॥ (यथा, भट्टिकाव्ये । ५ । ६० ।

"मृषोद्यं प्रवदन्तीं तां सत्यवद्यो रघूत्तमः ॥")

मृषोद्यः, त्रि, मिथ्यावादी । इति शब्दमाला ॥

मृष्टं, क्ली, (मृज+क्तः ।) मरिचम् । इति राजनिर्घण्टः ॥

मृष्टः, त्रि, (मृज+क्त ।) शोधितम् । इत्यमरः । ३ । ४ । ५६ ॥ (यथा, बृहत्संहितायाम् । ८५ । ६ ।

"अशुभकरमतोऽन्यथाप्रदिष्टं
स्थितपतितं च करोति मृष्टमन्नम् ॥")

मृष्टेरुकः, पुं, वदान्यः । मिष्टाशी । अतिथिद्विट् । इति मेदिनी । के, २०६ ॥

मॄ, श वधे । इति कविकल्पद्रुमः ॥ (क्र्या०-पर०-सक०-सेट् ।) श, मृणाति । मूर्णः । मर्त्तः । इति दुर्गादासः ॥

मे, ङ प्रतीदाने । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-अनिट् ।) प्रतीदानं परिवर्त्तः । ङ, मयते धान्येन माषं लोकः । इति दुर्गादासः ॥

मे, त्रि, मह्यम् । आमाके इति भाषा । मम आमार इतिभाषा । एते अस्मच्छब्दस्य चतुर्थीषष्ठ्येकवचनाभ्यां निष्पन्ने । इति व्याकरणम् ॥

मेकः, पुं, (मे इति कायति शब्दं करोतीति । कै शब्दे+कः ।) छागः । इति राजनिर्घण्टः ॥

मेक(ख)लकन्यका, स्त्री, (मेक(ख)लः मेखलायुक्तः विन्ध्यपर्व्वतः तस्य कन्यका । तस्य नितम्बदेशात् निःसृतेत्यर्थः ।) नर्म्मदानदी । इत्यमरः । १ । १० । ३२ ॥

मेक(ख)लाद्रिजा, स्त्री, (मेक(ख)लात् नितम्बदेशोपलक्षितात् अद्रेर्जाता । जन+डः+स्त्रियां टाप् ।) नर्म्मदानदी । यथा,—

"रेवेन्दुजा पूर्व्वगङ्गा नर्म्मदा मेकलाद्रिजा ।"

इति हेमचन्द्रः ॥

मेक्षणं, क्ली, यज्ञीयपात्रविशेषः । (यथा, आश्वलायनश्रौतसूत्रे । २ । ६ । १२ ।

"मेक्षणेनादायावदानसम्पदा जुहुयात् ॥")

यथा, मेक्षणादीनाञ्च छन्दोगपरिशिष्टम् ।

"इध्मजातीयमिध्मार्द्धप्रमाणं मेक्षणं भवेत् ।
वृत्तं चाङ्गुष्ठपृथ्वग्रमवदानक्रियाक्षमम् ॥"

इध्मार्द्धप्रमाणम् ।

प्रादेशद्वयमिध्मस्य प्रमाणं परिकीर्त्तितमिति ।

तदर्द्धम् । एषैव दर्व्वी । विशेषस्तु मखाङ्गे ।

"दर्व्वी द्व्यङ्गुलपृथ्वग्रा तुरीयेण तु मेक्षणम् ।
मुसलोदूखले वार्क्षे स्वायते सुदृढे तथा ॥"

इति संस्कारतत्त्वम् ॥

मेखला, स्त्री, (मीयते प्रक्षिप्यते कायमध्यभागे इति । मि+संज्ञायां खलः गुणश्च स्त्रियां टाप् । इत्यमरटीकायां भरतमतम् ।) स्त्रीकट्याभरणम् । चन्द्रहार गोट् इत्यादि भाषा ॥ (यथा, रघुवंशे । ८ । ६४ ।

"अवमाप्य विलासमेखलां
किमिदं किन्नरकण्ठि ! सुप्यते ॥")

तत्पर्य्यायः । काञ्ची २ सप्तकी ३ रशना ४ सारसनम् ५ । इत्यमरः । २ । ६ । १०८ ॥ काञ्चिः ६ रसना ७ कक्षा ८ रसनम् ९ रशनम् १० कक्ष्या ११ सप्तका १२ सारशनम् १३ । इति शब्दरत्नावली ॥ कलापः १४ । इति जटाधरः ॥ सारसनं स्त्रीकट्यां बध्यमानम् । इति स्वामी ॥ केचित्तु ।

"एकयष्टिर्भवेत् काञ्ची मेखला त्वष्टयष्टिका ।
रशना षोडश ज्ञेया कलापः पञ्चविंशकः ॥"

इति पठन्ति । इह त्वभेदात् पर्य्यायता । इति भरतः ॥ खड्गादिनिबन्धनम् । इत्यमरः । २ । ८ । ९० ॥ शिखण्डिका । पर्व्वरज्ज्वादि । दार्ढ्यार्थं उपर्य्यधो लौहबन्धः । इत्येके । इत्यपि भरतः ॥ ॥ शैलनितम्बः । इति मेदिनी । ले, १२५ ॥ नर्म्मदानदी । इति शब्दरत्नावली ॥ पृश्निपर्णी । इति राजनिर्घण्टः ॥ ॥ उपनयनकाले धारणीयमुञ्जनिर्म्मितरज्जुबन्धनम् । यथा । अथैनं माणवकमाचार्य्यः प्रदक्षिणं त्रिवृत्तमुञ्जमेखलां परिधापयन् मन्त्रद्वयं वाचयति । इति भवदेवभट्टः ॥ अपि च । गोभिलः । मुञ्जकाशताम्बल्यो रशनाः । मुञ्जः शरः । ताम्बलः शणस्तद्भवा ताम्बली । रशना मेखला । तथा च मनुः ।

"मौञ्जी त्रिवृत्समा श्लक्ष्णा कार्य्या विप्रस्य मेखला ।
क्षत्त्रियस्य तु मौर्व्वी ज्या वैश्यस्य शणतान्तवी ॥
मुञ्जालाभे तु कर्त्तव्याः कुशाश्मन्तकबल्वजैः ।
त्रिवृता ग्रन्थिनैकेन त्रिभिः पञ्चभिरेव वा ॥"

इति संस्कारतत्त्वम् ॥

अन्यच्च ।

"गर्भाष्टमेऽष्टमे वाब्दे ब्रह्मचोक्तविधानतः ।
दण्डी च मेखली सूत्री कृष्णाजिनधरो मुनिः ॥
मौञ्जी त्रिवृत्समा श्लक्ष्णा कार्य्या विप्रस्य मेखला ।
मौञ्ज्यभावे कुशेनाहुर्ग्रन्थिनैकेन च त्रिभिः ॥"

इति कौर्म्मे उपविभागे ११ अध्यायः ॥ होमकुण्डोपरिस्थदत्तवेष्टनविशेषः । यथा, वह्निरूपचरात्रे ।